**दिनाङ्कः :- 06.10.2024** **सायम् - 06:20**

## आदौ-मुख्यवार्ताः

- मालदीवस्य राष्ट्रपतिः मोहम्मद मुइज़्ज़ु इत्यसौ पञ्चदिवसीय-भारत-यात्रायै अद्य राजधान्याम् नवदिल्ल्याम् सम्प्राप्ता।
- मंगलवासरे संजाते जम्मू-कश्मीर-हरियाणा-विधानसभयोः निर्वाचनस्य मतगणनायै सज्जता सजवं प्रचलति।
- भारतीयवायुसेनायाः द्विनवतितमवर्षस्य उत्सवस्य आरम्भः चेन्नईनगरे जातः। उत्सवस्य आरम्भे द्विसप्ततिः युद्धविमानानां वायुविमानानां च अद्भुतप्रदर्शनम् अभवत् ।
- महाराष्ट्रस्य मुख्यमन्त्री एकनाथ शिंदे अद्य चेंबूर-स्थितं अग्नि-दुर्घटना स्थलम् उपगतः। प्रत्येकं पीडितानां परिजनेभ्यः पञ्चलक्ष-रूप्यकाणां साहाय्यं च उदघोषयत्।
- भारत-बाङ्ग्लादेशयोः मध्ये विंशतिः प्रतिविंशतिः क्रिकेट-शृङ्खलायाः प्रथमा स्पर्धा अद्य ग्वालियर नगरे भविष्यति।
- महिलानां विंशतिः प्रतिविंशतिः क्रिकेट-चषक-स्पर्धा मालिकायान् अद्य भारत-पाकिस्तानयोः स्पर्धा प्रचलिता।

## अथ वार्ताः विस्तरेण

## मालदीवस्य राष्ट्रपतिः

मालदीवस्य राष्ट्रपतिः मोहम्मद मुइज़्ज़ु इत्यसौ पञ्चदिवसीय-भारत-यात्रायै अद्य राजधान्याम् नवदिल्ल्याम् सम्प्राप्ता। विदेशमन्त्री डॉक्टर सुब्रह्मण्यम जयशंकरः मालदीवस्य-राष्ट्रपतिना सह मेलनं करिष्यति। श्वः प्रातः राष्ट्रपति-भवने राष्ट्रपतेः मुइज़्ज़ु इत्यस्य औपचारिकं स्वागतं भविष्यति। सः प्रधानमन्त्रिणा नरेन्द्र-मोदिना सह द्विपक्षीय-क्षेत्रीय-परस्पर-हितसंबंधेषु अन्ताराष्ट्रिय-विषयेषु च संवादं करिष्यति। उपवेशनस्य अनन्तरं नैकानि सन्धिपत्राणि हस्ताक्षरिष्यन्ते इति सम्भाव्यते। मालदीवस्य राष्ट्रपतेः श्वः सायं राष्ट्रपतिना द्रौपदी मुर्मु वर्यया सह मेलनस्य अपि कार्यक्रमः वर्तते।

## मतगणना

मंगलवासरे संजाते जम्मू-कश्मीर-हरियाणा-विधानसभयोः निर्वाचनस्य मतगणनायै सज्जता सजवं प्रचलति। सुचारु-मतगणनायै हरियाणा-जम्मू-कश्मीरयोः सर्वेषु मतगणन-केन्द्रेषु कठोरसुरक्षाव्यवस्था कृता अस्ति। हरियाणा-विधानसभानिर्वाचने प्रायः सप्तषष्टि: प्रतिशतमितं मतदानं संजातम्। ह्यः राज्यस्य सर्वेषु नवतिः निर्वाचनक्षेत्रेषु मतदानम् अभवत्। मतदानप्रक्रियायाः शान्तिपूर्णसमाप्तेः अनन्तरं अधुना विभिन्नेषु जनपदेषु सशक्तकक्षेषु त्रिस्तरीय कठिनसुरक्षायाः अन्तर्गतं इलेक्ट्रॉनिक-मतदान-यन्त्राणि सुरक्षितानि सन्ति। जम्मू कश्मीर राज्ये त्रिषु चरणेषु सितम्बर मासस्य अष्टादश, पञ्चविंशतिः, अथ च अक्टूबर मासस्य प्रथमे दिनांके मतदानं सञ्जातम्। तत्र चतुः षष्टिप्रतिशतमितं मतदानं परिलक्षितम्।

अनुच्छेद सप्तत्यधिकत्रिशतम् इत्यस्य निष्कासनानन्तरं केन्द्र-शासितप्रदेशे प्रथमवारं विधान-सभानिर्वाचनं सफलतया पूर्णरीत्या च विहितम्।

## आईएएफ वायुसेना

भारतीयवायुसेनायाः द्विनवतितमवर्षस्य उत्सवस्य आरम्भः चेन्नईनगरे जातः। उत्सवस्य आरम्भे द्विसप्ततिः युद्धविमानानां वायुविमानानां च अद्भुतप्रदर्शनम् अभवत् । एकविंशतिः वर्षाणाम् अनन्तरं आयोजितं कार्यक्रमं द्रष्टुं मरीना समुद्रतटे लक्षशः प्रेक्षकाः एकत्रिताः आसन् । भारतीयवायुसेनायाः चेतकः, राफेल्, डकोटा, हार्वर्ड, एमआईजी, जगुआर चेत्यादीनि विमानानि उत्कृष्ट-प्रदर्शनानि विहितवन्तः।

## महाराष्ट्र

महाराष्ट्रस्य लातूरे पूर्णमल-लाहोटी-सर्वकारीय-प्रौद्योगिकी-महाविद्यालयस्य छात्रावासे गतदिने विषाक्त भोजनेन षष्टि: छात्रा: विलासराव-देशमुख-चिकित्सा-महाविद्यालये अथ अन्येषु चिकित्सालयेषु उपचाराय प्रविष्टा:। आरक्षिभि: अन्वीक्षणं आरब्धं कृतम् अस्ति। भोजनस्य अंश: परीक्षणाय प्रेषित:। घटनाया: अनन्तरं संसद-सदस्य: डॉ-शिवाजी-कालगे अथ च जनपदाधिकारी वर्षा-ठाकुर: इत्येताभ्यां चिकित्सालयं उपेत्य छात्रेभ्य: मेलनं कृतवन्तौ । सममेव स्वास्थ्यस्य स्थिति: च परिज्ञाता।

## मुंबई दुर्घटना

महाराष्ट्रस्य मुख्यमन्त्री एकनाथ शिंदे अद्य चेंबूर-स्थितं अग्नि-दुर्घटना स्थलम् उपगतः। प्रत्येकं पीडितानां परिजनेभ्यः पञ्चलक्ष-रूप्यकाणां साहाय्यं च उदघोषयत्। मुख्यमन्त्रिणा उक्तं यत् दुर्घटनायां व्रणितेभ्यः प्रशासनं निशुल्कम् उपचारं प्रदास्यति। अवधेयं यत् मुम्बय्यां चेंबूर स्थले अग्नि-दुर्घटनायां बालत्रयं समेत्य एकस्यैव परिवारस्य सप्त सदस्याः मृत्युं उपगताः। एषा दुर्घटना भवनस्य भूतल-स्थे विपण्यां विद्युत् तारेषु

अग्नि-कारणेन संजाता। मुम्बय्याः आरक्षि-उपायुक्तः हेमराजः अवोचत् यत् अग्निना व्रणित-जनाः शीघ्रं चिकित्सालयं नीताः। यत्र ते मृताः घोषिताः। दुर्घटनायाः अन्वीक्षणं विधीयते।

**विराम:**

**संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रम: आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय-तन्त्रांशे अपि उपलब्धो भविष्यति।**

-

**छत्तीसगढ़ जल जागरण**

छत्तीसगढ़स्य धमतरी जनपदे जल जागरण महोत्सव: महतोत्साहेन आमान्यते। द्विदिवसात्मकं महोत्सवोऽयं गंगरेल सेतो: पार्श्वे रविशंकर शुक्ल जलाशय परिसरे समारब्ध:। अस्मिन् अन्तर्राष्ट्रिय सम्मेलने यूनिसेफ, जापान, श्रीलंका अन्येच विविध देशानां पर्यावरणविदा: भाग ग्रहणं कुर्वन्ति।

**हॉकी**

हॉकी-इंडिया-इत्यनेन अद्य मलेशियायां आयोजयिष्यमाणस्य सुल्तान-जोहोर-कप-इत्यस्य द्वादशे संस्करणे प्रतिभागाय अष्टादश-सदस्यीय कनिष्ठ-वर्गीय पुरुष-दलस्य घोषणा कृता। नवनियुक्त: मुख्य-प्रशिक्षक: पी-आर-श्रीजेश: मलेशियायां भारतीय दलं प्रशिक्षयति। सममेव आमीर-अली-दलस्य नेतृत्वकर्ता अथ रोहित: तदीय सहायक: नियुक्तौ भविष्यत:।

भारतं अस्य मासस्य नवदशे दिनांके जापानं विरुध्य स्वीय अभियानस्य आरम्भं करिष्यति। तदनु विंशे दिने ब्रिटेन-दलेन द्वाविंशे-दिने मलेशिया-दलेन त्रयोविंशे दिने आस्ट्रेलिया-दलेन सह भारतस्य स्पर्धा भविष्यन्ति। निर्णायक-स्पर्धा अपि अस्य मासस्य षड्विंशे दिने भविष्यति।

**कोविड-निर्वाचनम्**

एकं राष्ट्रं एकं निर्वाचनम् इत्यस्य कृते गठितस्य समितेः अध्यक्षः पूर्वराष्ट्रपतिः रामनाथकोविन्दः उक्तवान् यत् सम्पूर्णे भारते युगपत् निर्वाचनं कृत्वा देशस्य महान् लाभो भविष्यति। ह्यः नवदिल्ल्यां सञ्जाते लालबहादुरशास्त्रीस्मृतिव्याख्याने सः अवदत् यत् युगपत् निर्वाचनेन उत्तमशासनं, नीतिस्थिरता, सामाजिकसङ्गतिः, आर्थिकवृद्धिः च भवितुम् अर्हति ।

## इस्राइल-लेबनान

इस्राइल-देशेन लेबनाने आक्रमणे तीव्रता विधाय बेरुत-नगरस्य दक्षिण-क्षेत्रे भीषणानि-वायु-आक्रमणानि कृतानि। येन नगरे भीषण-हानि: जाता। लेबनानस्य सुरक्षाधिकारिण: अनुसारं गतदिने उत्तर-नगरे त्रिपोल्यां आक्रमणं विहितम्। गतदिने विमानपत्तनस्य निकटवर्ती क्षेत्राणि समेत्य बेरुतस्य दक्षिण-क्षेत्रे इस्राइलेन न्यूनातिन्यूनं अष्ट आक्रमणानि विहितानि।

इत:पूर्वं इस्राइल-सैन्य बलेन जना: क्षेत्रं परित्यक्तुं आदिष्टा:। क्षेत्रे भषण-संघर्ष कारणेन फिलिस्तीन-शरणार्थिन: समेत्य सहस्रशो जना: लेबनानं परित्यक्तुं विवशा: सन्ति।

-

## महिला क्रिकेट स्पर्धा

महिलानां विंशतिः प्रतिविंशतिः क्रिकेट-चषक-स्पर्धा मालिकायान् अद्य भारत-पाकिस्तानयोः स्पर्धा प्रचलिता। पणकं विजित्य पाकिस्तान-दलेन षडोत्तरैकशतं धावनाङ्कानां विजयलक्ष्यं प्रदत्तम्। अन्तिम वार्ताः लेखन-समयं यावत् नव- क्षेपचक्रेषु एकस्य स्तोभस्य हानौ द्वाचत्वारिंशत् धावनाङ्काः अधिगताः।

## क्रिकेट

अपरत्र पुरुष-वर्गे भारत-बाङ्ग्लादेशयोः विंशतिः प्रतिविंशतिः क्रिकेट-शृङ्खलायाः प्रथमा स्पर्धा अद्य ग्वालियर नगरे भविष्यति। इयं स्पर्धा सायं सप्त वादनात् आरभते।

**।। इति वार्ताः।।**